# ॥ રેણુકાકવચમ્ ૩ ડામરેશ્વરતન્ત્રે ઈશ્વરપાર્વતીસંવાદે ॥

.. Renuka Kavacham 3
DAmareshvaratantra Ishvaraparvati ..

sanskritdocuments.org

May 21, 2017

# .. Renuka Kavacham 3 DAmareshvaratantra Ishvaraparvati ..

# ॥ રેણુકાકવચમ્ ૩ ડામરેશ્વરતન્ત્રે ઈશ્વરપાર્વતીસંવાદે ॥

## Sanskrit Document Information

Text title : reNukAkavacham 3 shrIDAmareshvaratantre IshvarapArvatIsaMvAde

File name : reNukAkavacham3.itx

Category : kavacha

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Description-comments : shrIDAmareshvaratantre IshvarapArvatIsaMvAde from shrIreNukAtantram, Pitambarapeeth, Datia

Latest update : May 18, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 21, 2017

*sanskritdocuments.org*

## ॥ રેણુકાકવચમ્ ૩ ડામરેશ્વરતન્ત્રે ઈશ્વરપાર્વતીસંવાદે ॥

॥ શ્રી ગણેશાય નમઃ ॥

શ્રી દેવ્યુવાચ

ભગવન્ બ્રૂહિ કવચં ભુક્તિ-મુક્તિ-પ્રદાયકમ્ ।
ત્રૈલોક્યમોહનં નામ કૃપયા મે જગદ્ગુરો ॥

ઈશ્વર ઉવાચ
શૃણુ દેવિ વરારોહે કવચં બ્રહ્મરૂપિણિ ।
બ્રહ્મેશ-પ્રમુખાધીશ-નારાયણ-મુખાચ્યુતમ્ ॥

કવચં રેણુકાદેવ્યાઃ યઃ પઠેત્પ્રયતો નરઃ ।
તચ્છ્રુત્વા પઠનાદ્બ્રહ્મા સૃષ્ટિકર્તાઽભવત્પ્રભુઃ ॥

કૃષ્ણો દૂર્વાદલશ્યામો દેવકી ગર્ભસમ્ભવઃ ।
હ્યત્પદ્મે રેણુકાં ધ્યાત્વા ઋદ્ધિ-સિદ્ધિ-ફલપ્રદામ્ ॥

સર્વાઃ શ્યામા ભવન્ત્યેતાઃ જનાર્દન-વિભૂતયઃ ।
એવં દેવગણાઃ સર્વે સર્વૈશ્વર્યમવાપ્નુયુઃ ॥

શિષ્યાય ગુરુભક્તાય સાધકાય પ્રકાશયેત્ ।
યો દદાત્યન્યશિષ્યાય શઠાય પશુરૂપિણે ॥

પઞ્ચત્વં જાયતે તસ્ય હ્યથવા વાતુલો ભવેત્ ।
કવચસ્યાસ્ય સુભગે યોગી રુદ્ર ઋષિઃ સ્વયમ્ ॥

વિરાટ્ છન્દો નિગદિતં દેવતા રેણુકા પરા ।
ધર્માર્થકામમોક્ષેષુ વિનિયોગ ઉદાહૃતઃ ॥

ક્લીં ક્લીં ક્લીં મે શિરઃ પાતુ ભાલં નેત્રયુગં તથા ।
રેણુકા નેત્રયુગલં ક્લીં ક્લીં નાસાપુટદ્વયમ્ ॥

રામમાતા ચ મે પાતુ સજિહ્વાં મુખમેવ ચ ।
ભુજયુગ્મં તથા પાતુ ક્લીં ક્લીં મે ત્ર્યક્ષરાત્મિકા ॥

કણ્ઠં ચ ચિબુકં ચૈવ રક્ષેન્મે જગદમ્બિકા ।
સ્વાહાઽવતુ બ્રહ્મરન્ધ્રં મહાપુરનિવાસિની ॥

ક્લીં ક્લીં મે રેણુકા પશ્ચાત્ રક્ષેન્મે પાદમેવ ચ ।
ક્લીં ક્લીં મે હૃદયં પાતુ ક્લીં ક્લીં મે પાર્શ્વમેવ ચ ॥

ક્લીં ક્લીં મે નાભિકમલં ક્લીં ક્લીં મે પૃષ્ઠમેવ ચ ।
ક્લીં ક્લીં મે દ્વિફડન્તે ચ સ્વાહેતિ પરિકીર્તિતા ॥

એકાક્ષરી મહાવિદ્યા સર્વાઙ્ગં મે સદાઽવતુ ।
પ્રાચ્યાં રક્ષતુ માં દેવિ આગ્નેયાં માતૃકા તથા ॥

રેણુકા દક્ષિણે રક્ષેદ્રામમાતા ચ નૈરૃત્યે ।
વિરોધિની પ્રતીચ્યાં મે વાયવ્યાં જગદમ્બિકા ॥

ઉગ્રા રક્ષેદુદીચ્યાં ચ ઈશાન્યાં માં પ્રભાવતી ।
દીપ્તા રક્ષેત્ત્વધોભાગે નીલા ચૈવોર્ધ્વદેશિકે ॥

પુત્રમિત્રકલત્રાદીન્ દેવી રક્ષતુ સર્વદા ।
ઇતિ તે કથિતં દેવિ સર્વમન્ત્રૌઘવિગ્રહમ્ ॥

ત્રૈલોક્યમોહનં નામ કવચં બ્રહ્મરૂપિણી ।
બ્રહ્મેશ-પ્રમુખાધીશ-નારાયણ-મુખાચ્યુતમ્ ॥

કવચં રેણુકા દેવ્યાઃ યઃ પઠેત્પ્રયતો નરઃ ।
સ સર્વસિદ્ધમાપ્નોતિ સત્યમેવ ન સંશયઃ ॥

ગાને તુ તુમ્બરુઃ સાક્ષાદ્દાને વૈ વાસવો યથા ।
દત્તાત્રેયસમો જ્ઞાને ગઙ્ગેવ મલનાશકઃ ॥

કામદેવસમો રૂપે વાયુતુલ્યઃ પરાક્રમે ।
સ ભવેત્સાધકઃ શ્રેષ્ઠઃ સત્યં સત્યં મયોદિતમ્ ॥

ન હન્યતે ગતિસ્તસ્ય વાયોરિવ નભસ્તલે ।
શતમષ્ટોત્તરં ચાસ્ય પુરશ્ચર્યાવિધિસ્મૃતઃ ॥

હવનં તદ્દશાંશેન કૃત્વા તત્સાધયેદ્ભુવમ્ ।
યદિ ચેત્ સિદ્ધકવચઃ શિવતુલ્યો ભવેત્સ્વયમ્ ॥

પઠનાદ્ધારણાત્સર્વા પૃથ્વી કાશીપુરીસમા ।
યત્ર કુત્ર વિપન્નોઽપિ વારાણસ્યાં મૃતો ભવેત્ ॥

ન મન્ત્રો નૌષધં તસ્ય નાકાલમરણં તથા ।

ભવત્યેવ મહેશાનિ કવચે હૃદિ સંસ્થિતે ॥

અશ્વમેધસહસ્રાણિ વા જપેય શતાનિ ચ ।
મહાદાનાનિ યાન્યેવ પ્રાદક્ષિણ્યં ભુવસ્તથા ॥

કલાં નાર્હન્તિ તાન્યેવ સકૃદુચ્ચારણાદતઃ ।
પુષ્પાઞ્જલિં રેણુકાયૈ મૂલેનૈવ સદાઽર્પયેત્ ॥

શતવર્ષસહસ્રાયાઃ પૂજાયાઃ ફલમાપ્નુયાત્ ।
લિખિત્વા ભૂર્જપત્રે તુ વધ્નીયાત્સર્વકાર્યકે ॥

ઇદં કવચમજ્ઞાત્વા યો જપેદ્રેણુકાં શિવામ્ ।
શતલક્ષં પ્રજપ્ત્વાઽપિ ન મન્ત્રઃ સિદ્ધિદાયકઃ ॥

ઇતિ શ્રીડામરેશ્વરતન્ત્રે ઈશ્વરપાર્વતીસંવાદે રેણુકાકવચં સમાપ્તમ્ ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail. com

.. Renuka Kavacham 3 DAmareshvaratantra Ishvaraparvati ..
was typeset using XƎLATEX 0.99996
on May 21, 2017

Please send corrections to *sanskrit@cheerful.com*